प्रथमभागः

द्वितीयः पाठः

२. बुद्धिरेव गरीयसी

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।

१. एतस्य चित्रस्य कथां वदन्तु।
२. शशकः इव चतुराः जन्तवः के के सन्ति?
३. शक्तिः, युक्तिः - एतयोः का आवश्यकी? किमर्थम्?

SCERT TELANGANA

पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।

(कस्मिंश्चित् अरण्ये केचन गजाः निवसन्ति स्म। तत्र कदाचित् वृष्टिकाले वृष्टेः अभावतः ते तृषया पीडिताः। अतः ते स्वस्वामिनः महागजस्य समीपं गत्वा एवम् अवदन्।)

गजाः - हे गजराज! अस्माकं जीवनाय कः उपायः? अस्मिन् अरण्ये वृष्टेः अभावात् अल्पजन्तूनां निमज्जनाय जलाशयः कोऽपि नास्ति। किमुत अस्माकं निमज्जनाय? अतः हे महागज! निमज्जनस्थानस्य अभावात् जीवन्तः अपि मृताः इव स्मः। किं कुर्मः?

(ततः गजानां वचांसि श्रुत्वा गजराजः किञ्चिद् दूरं गत्वा स्वच्छमेकं सरोवरं तान् दर्शयन् अवदत्।)

गजराजः - हे सुहृदः! निमज्जनयोग्यः सुन्दरः निर्मलश्च सरोवरः अत्रैव वर्तते। इदानीम् आरभ्य भवतां पिपासापूर्तिः भवतु। (इति उक्त्वा गजराजः गजान् सरोवरं दर्शयित्वा ततः निर्गतः।)

(ततः आरभ्य गजाः सर्वेऽपि जलपानार्थं स्नानार्थं च तं सरोवरं गच्छन्ति स्म। गजानां पादहतिभिः सरोवरसमीपे तृणादिकं सर्वं नष्टम् अभवत्। शशकाः स्वाहारस्य तृणादिकस्य नाशेन नितरां कृशाः दुःखिताः च अभवन्। ततः शशकराजः शिलीमुखः एवम् अवदत्।)



SCERT TELANGANA

शिलीमुखः - पिपासापीडिताः एते गजाः प्रत्यहम् एतं सरोवरम् आगच्छन्ति। एतेषां गजानां पादहतिभिः अस्माकम् आहारः प्रतिदिनं नश्यति। इतःपरमपि एवमेव भवति चेत् आहारस्य अभावेन अस्माकं कुलम् अवश्यं विनश्यति। अतः एतां समस्यां परिहर्तुं कोऽपि उपायः चिन्तनीयः एव।

(ततः तत्रैव अन्यः कश्चित् विजयः नाम वृद्धशशकः तं शिलीमुखम् अवदत्। ''दैन्यं मास्तु। अहम् अवश्यं कञ्चन प्रतीकारं करिष्यामि''। (इति प्रतिज्ञां कृत्वा सः वृद्धशशकः ततः निर्गतः। गच्छन्नेव सः एवं चिन्तितवान्।)

विजयः - गजसमूहसमीपे स्थित्वा कथं वक्तव्यम्? यतः -

श्लो।। स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजङ्गमः।
पालयन्नपि भूपालः प्रहसन्नपि दुर्जनः।।

अतः अहं पर्वतशिखरम् आरुह्य गजराजेन स्नेहं करोमि। (इति विचिन्त्य पर्वतम् आरूढवान्।) (तं वृद्धशशकं दृष्ट्वा गजराजः पृच्छति।)

गजराजः - भवान् कः? कुतः आगतः?

विजयः - शशकोऽहम्। भगवान् चन्द्रः मां भवतः समीपं प्रेषितवान्।



SCERT TELANGANA



गजराजः - वदतु, मत्तः किम् इच्छति भगवान् चन्द्रः।

विजयः - चन्द्रः भवन्तं सरोवरनिकटम् आहूतवान्। (इति गजराजं सरोवरनिकटं नयति।) तदिदं चन्द्राज्ञया वदामि। शृणोतु, ''चन्द्रसरोवररक्षकाणाम् एतेषां शशकानाम् आहारः भवता नाशितः। एतत् अनुचितम्। तान् शशकान् अहं बहुकालतः रक्षामि। अत एव मम शशाङ्कः इति प्रसिद्धिः। भवान् एतं सरोवरं त्यक्त्वा सर्वैः गजैः सह दूरं न गमिष्यति चेत् भवतः सर्वमपि गजकुलं नाशयिष्यामि।'' इत्युक्त्वा कोपात् कम्पमानं भगवन्तं शशाङ्कं सरोवरे दर्शितवान्।

(एतत् वचनं श्रुत्वा, जले कम्पमानं भगवन्तं चन्द्रं च दृष्ट्वा गजराजः भयकम्पितः सन् अवदत्।)

गजराजः - क्षम्यतां क्षम्यताम्। इदम् अज्ञानतः अभवत्। भविष्ये एवं कदापि न भविष्यति।

(ततः शशकः रात्रौ जले चञ्चलं चन्द्रबिम्बं गजराजं दर्शयन् तत्र पुनः न आगन्तुं प्रमाणं कारितवान्।)

विजयः - हे चन्द्रदेव! भवतः विषये अज्ञानात् अनेन अपराधः कृतः। एषः पुनः एतादृशम् अपराधं न करिष्यति। एतं सरोवरं पुनः नागमिष्यत्येव।

ततः गजराजः सर्वैः गजैः सह तं सरोवरं परित्यज्य दूरं गतवान्। शशकाः निर्भीताः सन्तः तस्य सरोवरस्य तीरे सुखेन अवसन्। अतः एव उच्यते - ''उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः।''

एतानि कुर्वन्तु

१. श्रुण्वन्तु, विचिन्त्य वदन्तु

१. चित्रे किं किम् अस्ति?

२. सम्भाषणं केषां मध्ये प्रवर्तते?

३. पाठे बुद्धिमान् कः अस्ति? किमर्थम्?

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ. पाठे कठिनपदानि चित्वा '⬭' इति चिह्नेन चिह्नीकुर्वन्तु। पदकोशस्य/अध्यापकस्य साहाय्येन अर्थान् जानन्तु।

आ. पाठं पठित्वा अधः दत्तानां प्रश्नानां समुचितसमाधानस्य चयनं कुर्वन्तु।

१) शशकानाम् आहारः कः?
अ) मांसः आ) पुष्पाणि इ) जलम् ई) तृणम् ( )

२) शशकं गजस्य समीपं कः प्रेषितवान्?
अ) इन्द्रः आ) चन्द्रः इ) सूर्यः ई) महाराजः ( )

३) चन्द्रस्य शशाङ्कः इति नाम कथम् अभवत्?
अ) शशकरक्षणेन आ) शशकभक्षणेन ( )
इ) शशकहरणेन ई) शशकतृणस्य खादनेन

४) जले कीदृशः चन्द्रः दृष्टः?
अ) गर्वितः चन्द्रः आ) हसितः चन्द्रः ( )
इ) कुपितः चन्द्रः ई) धावितः चन्द्रः

इ. अधः दत्तानि वाक्यानि पठन्तु। तानि वाक्यानि कोष्ठकस्थितेषु केन उक्तानि इति ज्ञात्वा लिखन्तु।

(शिलीमुखः, गजाः, गजराजः, विजयः, शशाङ्कः)

अ) अस्माकं जीवनाय कः उपायः?
आ) निमज्जनयोग्यः सुन्दरः सरोवरः अत्रैव वर्तते।
इ) अहम् अवश्यं कञ्चन प्रतीकारं करिष्यामि।
ई) शशाङ्कः मां प्रेषितवान्।
उ) अज्ञानेन अनेन अपराधः कृतः।
ऊ) इदम् अज्ञानेन अभवत्।
ऋ) एतां समस्यां 'परिहर्तुं' कोऽपि उपायः चिन्तनीयः।

SCERT TELANGANA

३. लेखनं, स्वीयरचना

अ. पठन्तु, लिखन्तु

अ) गजाः गजराजं किमवदन्?
आ) गजानां समस्या का?
इ) शशकराजस्य नाम किम्?
ई) वृद्धशशकस्य नाम किम्?
उ) विजयः चन्द्राज्ञां किमिति वदति?
ऊ) पाठेऽस्मिन् सम्बोधनात्मकपदानि सन्ति। तानि एकत्र लिखन्तु।

आ. चिन्तयन्तु, लिखन्तु

अ) गजराजस्य भयस्य कारणं किम्?
आ) विजयस्य उपायः कः?
इ) गजानां समस्यां गजराजः कथं निवारितवान्?
ई) उपायेन किं किं शक्यम्? अन्यदेकमुदाहरणं लिखन्तु ।
उ) शशकः इव अन्योपायं चिन्तयित्वा कथां मातृभाषया पुनर्लिखन्तु।

४. पदजालाभिवृद्धिः, भाषाक्रीडाः

१. गजस्य तुलनाम् अन्यवस्तुभिः कृत्वा उदाहरणानुगुणम् वाक्यानि लिखन्तु।



शूर्पः उदा- गजस्य कर्णौ शूर्पाकारौ स्तः।

स्तम्भः ....

कदली ....

भाण्डम् ....

सर्षपः ....

 पर्वतः ....

SCERT TELANGANA

२. चित्राणि दृष्ट्वा सम्बद्धवाक्यानि लिखन्तु।

....



....

....

....

३. 'प्रतिदिनम्', 'अवश्यं' इत्येतौ शब्दौ उपयुज्य पञ्चवाक्यानि लिखन्तु।

उदा : अहं प्रतिदिनम् अवश्यं देवं नमामि।

५. व्याकरणांशाः

१. अत्र कानिचन वाक्यानि दत्तानि। उदाहरणानुसारं सम्बोधनात्मकपदम् उपयुज्य तानि परिवर्तयन्तु।

उदा - गजराजः उपायं वदति।

हे गजराज! उपायं वदतु।

अ) गजः सरोवरं गच्छति। ....

आ) शिलीमुखः विजयेन मिलति। ....

इ) गजराजः सरोवरतः दूरं गच्छति। ....

ई) चन्द्रदेवः मां क्षाम्यति। ....

उ) शशकाः निर्भीताः भवन्ति। ....

SCERT TELANGANA

ऊ. अधः दत्तानि पदानि पठन्तु । एतानि सम्बोधनप्रथमाविभक्तेः रूपाणि।

	एकवचनम्	द्विवचनम्	बहुवचनम्
पुंलिङ्गे	हे शशक!	हे शशकौ!	हे शशकाः!
	हे गज!	हे गजौ!	हे गजाः!
	हे चन्द्र!	हे चन्द्रौ!	हे चन्द्राः!
स्त्रीलिङ्गे	हे बालिके!	हे बालिके!	हे बालिकाः!
	हे लते!	हे लते!	हे लताः!
	हे गायिके!	हे गायिके!	हे गायिकाः!
नपुंसकलिङ्गे	हे मित्र!	हे मित्रे!	हे मित्राणि!
	हे मुख!	हे मुखे!	हे मुखानि!

३. अधः दत्तानि विभिन्नधातूनां भूतकालस्य प्रथमपुरुषरूपाणि पठन्तु, अवगच्छन्तु। एकवचन-बहुवचनरूपाणि उपयुज्य वाक्यनिर्माणं कुर्वन्तु।

भूतकाले -	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषे	अभवत्	अभवताम्	अभवन्
	अवदत्	अवदताम्	अवदन्
	अपठत्	अपठताम्	अपठन्
	अलिखत्	अलिखताम्	अलिखन्
	अनयत्	अनयताम्	अनयन्
	अगच्छत्	अगच्छताम्	अगच्छन्
	अयच्छत्	अयच्छताम्	अयच्छन्
	अखादत्	अखादताम्	अखादन्
	अपिबत्	अपिबताम्	अपिबन्
	अकरोत्	अकुरुताम्	अकुर्वन्
	आसीत्	आस्ताम्	आसन्

६. सर्जनात्मकव्यक्तीकरणम्

१. पाठ्यांशस्य कथां नाटकरूपेण प्रदर्शयन्तु।

२. जीवने किमपि कष्टम् भवति चेत् कथम् उपायेन कार्यं साधयितुं शक्यमिति वदन्तु।

SCERT TELANGANA

७. परियोजनाकार्यम्

१. ''उपायेन हि यच्छक्यं न तत् शक्यं पराक्रमैः'' इत्यनया शीर्षिकया बह्व्यः कथाः कथापुस्तिकासु लभ्यन्ते। तासु एकां कथां लिखित्वा आनयन्तु।

८. प्रशंसा

नागभूषणः - हे सखे! मधो! गतदिने क्रिकेट् स्पर्धा दृष्टवान् वा?

मधुः - आम्। दृष्टवान्। परन्तु अध्यापकैः दत्तान् लक्ष्यात्मकप्रश्नान् न पठितवान्। समयः नासीत्। भवान् पठितवान् वा।

नागभूषणः - आम्, पठितवान्।

मधुः - भवानपि स्पर्धां दृष्टवान् खलु! तर्हि पठनं कथं साध्यमभवत्?

नागभूषणः - तेषां खेलनसमये मध्ये मध्ये विज्ञापनानि आगतानि किल। अतः क्रीडां पश्यन् सप्ततिप्रश्नान् सम्पूर्णतया पठितवान्।

मधुः - समुचितः उपायः। भवान् मेधावी।

(मधुरिव भवानपि/भवत्यपि उपायशालिनं मित्रं कथम् अभिनन्दति।)

SCERT TELANGANA

स्वीयमूल्याङ्कनम्

	आम्	न	किञ्चित्
१.पाठं धारालतया पठितुं शक्नोमि ।			
२.पाठस्य सारांशं स्वीयवाक्यैः वक्तुं शक्नोमि ।			
३.उपायेन किं किं कर्तुं शक्यम् इति लेखितुं शक्नोमि ।			
४.पाठ्यांशस्य कथां नाटकरूपेण प्रदर्शयितुं शक्नोमि ।			

विद्या योगेन रक्ष्यते

गीतम्

पुत्री मम खलु निद्राति

पुत्री मम खलु निद्राति
पुत्री मम खलु निद्राति।
सुन्दरशयने सुखमयवसने
पुत्री मम खलु निद्राति ॥

रे रे वायस! कर्कशकण्ठ!
मा रट मा रट कर्णकठोरम् ।
श्रान्ता क्लान्ता पुनरनुनीता
पुत्री मम खलु निद्राति ॥

म्याँव्, म्याँव् मा कुरु घोरविरावं
चल चल रे खल चोरबिडाल!
स्निग्धा मुग्धा सेवितदुग्धा
पुत्री मम खलु निद्राति ॥

उच्चैर्मा भष शुनक! वराक!
भौ भौ मा कुरु कार्यविहीन ।
विमला कुशला सुमनोमृदुला
पुत्री मम खलु निद्राति ॥

रे रे मशक! मा कुरु गानं
मा स्पृश मा दश रक्तपिपासो!
सुदती सुमुखी शोभनगात्री
पुत्री मम खलु निद्राति ॥

- डा. विश्वासः

SCERT TELANGANA